শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীৱণ্শঠকোপ শ্রীপরাঙ্কুশ যতীন্দ্র মহাদেশিকৈরনুগৃহীতম্

# ॥ শ্রীমদাদিৱণ্শঠকোপযতীন্দ্র মহাদেশিক মঙ্গলম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমদাদিৱণ্শঠকোপযতীন্দ্র মহাদেশিক মঙ্গলম্॥

শ্রীশ্রীনিৱাসযতিরাণ্নারাযণমুনীশ্ৱরৌ।
ৱীররাঘৱৱেদান্তযতীন্দ্রমভিসংশ্রযে॥

কন্যাজ্যেষ্ঠাৱতীর্ণায কারুণ্যাৎ কমলাপতেঃ।
আদিৱণ্শঠকোপাখ্যযতীন্দ্রাযাস্তু মঙ্গলম্॥ **1** ॥

সাক্ষাচ্ছঠারির্যোগীন্দ্রঃ সমাহূয স্ৱনামতঃ।
পাঞ্চজন্যাদিকং যস্মৈ দত্তৱাংস্তস্য মঙ্গলম্॥ **2** ॥

অহোবিলে শ্রীনৃসিংহঃ প্রেষমন্ত্রং স্ৱযং দদৌ।
যোগিরূপেণ যস্যাস্মৈ শঠকোপায মঙ্গলম্॥ **3** ॥

ভাষ্যকারঃ পুনর্ভূমৌ ভাষ্যপ্রৱচনাদরাৎ।
যদ্রূপেণাগতস্তস্মৈ শঠকোপায মঙ্গলম্॥ **4** ॥

রহস্যত্রযসারাখ্যরাকাচন্দ্রস্য ৱারিধিঃ।
ৱেদান্তদেশিকস্সোঽযমেৱং তর্ক্যায মঙ্গলম্॥ **5** ॥

শ্রীনৃসিংহদযাদত্তশ্রীমদাস্থানৱারিধেঃ।
অকলঙ্কঃ কলানাথো যস্তস্মৈ নিত্যমঙ্গলম্॥ **6** ॥

শ্রীৱৈষ্ণৱসমাজস্য শ্রীসমাখ্যাতসংপদঃ।
কারণং যোঽভৱত্তস্মৈ শঠকোপায মঙ্গলম্॥ **7** ॥

লক্ষ্মীনৃসিংহকরুণা লক্ষ্মীৱিহরণোচিতঃ।
য আদিশঠকোপাখ্যঃ তস্মৈ ভৱতু মঙ্গলম্॥ **8**॥

যন্মঙ্গলাশাসনেন যচ্ছন্মঙ্গলমন্ৱহম্।
শ্রীনৃসিংহস্সঞ্চরতি তস্মৈ ভৱতু মঙ্গলম্॥ **9**॥

যৎকটাক্ষেণ সর্ৱেঽপি যৎস্থানাগতযোগিনঃ।
শ্রী নৃসিংহদযাপূর্ণাঃ তন্মুনের্মঙ্গলং সদা॥ **10**॥

যচ্ছিষ্যাগ্র্যো ৱৈদিকানাং সার্ৱভৌমৎৱমেত্য চ।
রত্নাকরাদীন্ কৃতৱাংস্তন্মুনের্মঙ্গলং সদা॥ **11**॥

নারাযণমুনীন্দ্রাখ্যো যচ্ছাত্রো যৎকৃপাৱশাৎ।
ষষ্টিপ্রবন্ধনির্মাতা খল্ৱস্মৈ মঙ্গলং সদা॥ **12**॥

‡ শ্রীশঠারিযতীন্দ্রাদি যোগিহৃৎপদ্মভানৱে।
সর্ৱত্র পরিপূর্ণাযাহোবিলেশায মঙ্গলম্॥ **13**॥

‡ পরাঙ্কুশমুনীন্দ্রেণ ভক্ত্যাস্মৈ মঙ্গলং কৃতম্।
যঃ পঠেৎ স ভৱেদ্ধন্যঃ শ্রীনৃসিংহকৃপাৱশাৎ॥ **14**॥

শ্রীরামানুজসিদ্ধান্তনির্ধারণ ধুরন্ধরঃ।
আদিৱণ্শঠকোপাখ্যযতীন্দ্রো জযতাৎ ভুৱি॥ **15**॥

॥ ইতি শ্রীমদাদিৱণ্শঠকোপযতীন্দ্র মহাদেশিক মঙ্গলং সমাপ্তম্॥